काण्य त्रि० काटे विषममार्गे कूपे वा भवः यत् । १ विषममार्गभवे २कूपभवे च ३रुद्रभेदे पु० । “नमः काट्याय च नीप्याय च” यजु० १६,३७, नमः काट्याय च गह्वरेष्ठाय च”। “काटे कूपे विषममार्गे वा भवः” वेददी० ।

काठ पु० कठ्यते तङ्क्यते कठ—तङ्कने कर्म्मणि घञ् । १पाषाणे त्रिका० । कठस्येदम् अण् । २कठसम्बन्धिनि त्रि० स्त्रियां ङीप् ।

काठक न० कठानां धर्म्म आम्नायः समूहो वा वुञ् । १कठशाखाध्यायिधर्म्मे २तदाम्नाये ३तत्समूहे च “देवस्तुम्नयोर्यजुषि काठके” पा० कठशब्दे व्याकृतमेतत् । “यद्रोदीत्तद्रुद्रस्य रुद्रत्वमिति काठकम्” निरु० ।

काठिन्यफल पु० काठिन्यं फलेऽस्य । कपित्थे राजनि० ।

काठेरणि पु० ऋषिभेदे । तस्येदं तत्रभवो वा गहा० छ । काठेरणीय तत्सम्बन्धिनि तत्रभवे वा त्रि० ।

काण पु'स्त्री कण—निमीलने संज्ञायां कर्त्तरि घञ् । १काके मेदि० स्त्रियां जातित्वात् ङीष् । २एकचक्षुर्युक्ते त्रि० । काणत्वञ्च चक्षुरिन्द्रियशून्यैकगोलकवत्त्वम् । “पौनर्भवस्य काणस्य यस्योपपतिर्गृहे” “वीक्ष्यान्धो नवतेः काणः षष्टेः श्वित्री शतस्य तु” अपाङ्क्तेयकथने मनुः । “खञ्जो वा यदि वा काणो दातुः प्रेष्योऽपि वा भवेत्” “काणं वाप्यथवा खञ्जमन्यं वापि तथाविधम् । तथ्येनापि ब्रुवन् दाप्यो दण्डं कार्षापणं वरम्” मनुः । अस्य निरुक्तौ ६अ० “अदायिकाणे विकटे” इत्यृचमधिकृत्य अन्याऽपि निरुक्तिर्दर्शिता यथा—“अदायिनि काणे विकटे विक्रान्तदर्शने इत्यौपमन्यवः । कणतेर्वा स्यादणूभावकर्म्मणः । कणतिः शब्दाणूभावे भाष्यतेऽनुकणतीति मात्राणूभावात् कणादर्शनाणूभावात् काणः” इति “परोपहासकृत् काणो गां दद्यात् स समौक्तिकाम्”शाता० परोपहासकर्म्मविपाकः काणत्वमुक्तम् । मनुना तु दीपनिर्वापककर्म्मविपाकत्वमुक्तम् । “दीपहर्त्ता भवेदन्धः काणो निर्वापको भवेत्” ।

काणभूति पु० वररुचिनामकात्यायनेन बृहत्कथाश्रावणोद्देश्ये पिशाचत्वप्राप्ते यक्षभेदे । “विन्ध्याटव्यां कुवेरस्य शापात् प्राप्तः पिशाचताम् । सुप्रतीकाभिधोयक्षः काणभूत्याख्यया स्थितः” “इत्याख्याय कथामध्ये विन्ध्यान्तः काणभूतये । पुनर्वररुचिस्तस्मै प्रकृतार्थमवर्ण्ययत्” इति च बृहत्क० तदितिहत्तं तत्रैव दृश्यम् ।

काणुक त्रि० कण—दीप्तौ बा० उकञ् । १कान्ते २क्रान्ते ३पूर्णीकृते च । “इन्द्रः सोमस्य काणुका” ऋ० ८,७७,४ । “काणुका कान्तानि क्रान्तानि सोमेन, कृतानि वा सोमपूर्णानि” भा० । निरुक्ते तु इमामृचमधिकृत्य ५,११, उक्तं यथा—“काणुका कान्तकानीति वा क्रान्तकानीति वा कृतकानीति वा इन्द्रः सोमस्य कान्त इति वा कणेघात इति वा कणेहतः कान्तिहत इति” । तत्र पृषो० सर्व्वत्र साधु ।

काणूक पुंस्त्री कणति कण–ऊकण् । वायसे उज्ज्व० । स्त्रियां जातित्वात् ङीष् ।

काणेय पुंस्त्री काणायाः अपत्यम् “स्त्रीभ्यो ढक्” पा० ढक् । काणाया अपत्ये पक्षे “क्षुद्राभ्यो वा” पा०ढ्रक् । काणेरतत्रार्थे पुंस्त्री “क्षुद्राश्च अङ्गहीनाः शीलहीनाश्च” सि० कौ० । काणेयानां विषयो देशः भैरिका० विधल् । काणेयविध तद्विषये देशे ।

काणेली स्त्री १अनूढायां कन्यायाम् २असत्यां स्त्रियाञ्च । “काणेलीमातः ! वामतस्तस्य सार्थवाहस्य गृहम्” मृच्छ० ।

काण्टकमर्द्दनिक त्रि० कण्टकमर्दनेन निर्वृत्तम् अक्षद्यूता० ठक् । कण्टकमर्द्दनेन निर्वृत्ते स्वास्थ्यादौ ।

काण्ठेविद्धि पुंस्त्री कण्ठे विद्धः ७त० सप्तम्याः अलुक् कण्ठेविद्धऋषिभेदस्तस्यापत्यम् इञ् । कण्ठेविद्धस्यापत्ये स्त्रियां तु गोत्रप्रत्ययान्तत्वात् वा ष्यञ् पक्षे ङीष् । काण्ठेविद्ध्या काण्ठेविद्धी वा ।

काण्ड पुंन० कनी—दीप्तौ ड तस्य नेत्त्वं किच्च दीर्घः । १दण्डे २वाणे ३पर्वणि कुत्सिते ४वर्गे ५अवसरे ६जले च अम० । ७नाले (डाँटा) ८वृक्षस्कन्धे (गुँडि) ९स्तम्बे (गुल्मभेदे) १०निर्जने धरणिः ११नाडीवृन्दे १२वृक्षभेदे (शरवृक्षे) मेदि० । १३श्लाघायां हेमच० । दण्डश्चात्र षोड़शहस्तमितः वंशः वंशादिखण्डश्च “काण्डान्तात् क्षेत्रे” पा० क्षेत्रे यः काण्डान्तो द्विगुस्ततो न ङीप् तद्धितलुकि सति द्वे काण्डे प्रमाणमस्याः सा द्विकाण्डा क्षेत्रभक्तिः । “प्रमाणे द्वयसजिति” पा० विहितस्य मात्रचः “प्रमाणे लोद्विगोर्नित्यमिति” वार्त्ति० लुक् । क्षेत्रे किं द्विकाण्डी रज्जुः” सि०कौ० । “पृषता वरत्राकाण्डेनाहन्ति” कात्या० ८,७,२७ । वरत्राकाण्डेन वंशदण्डेन”कर्कः । वाणे “सविषं काण्डमादाय मृगयामास वै मृगम्”भा०अनु०२६५श्लो० । वर्गे “अपातमत्काण्डमलीमसं नभः” माघः । “वृक्षकाण्डमितो भाति” रामा० । “दूर्वाकाण्डमिव